SHODHPATRA: INTERNATIONAL JOURNAL OF SCIENCE AND HUMANITIES
E-ISSN: 3048-6041 | Volume- 1, Issue- 9 | September 2024

# धर्मशास्त्रे प्रतिपादितं प्रायश्चित्तविमर्शः

सत्येन बर्मन
गवेषकः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः
satyenbarmangkd@gmail.com

**सारांश-** भारतीयेषु वाङ्मये सर्वाधिकं चर्चितं सुप्रसिद्धं च महत्त्वपूर्णं धर्मशास्त्रं स्मृतयः इति एव कथ्यते। यासु सर्वोत्कृष्टा मनुस्मृतिः। सा मनुसंहिता मानवधर्मशास्त्रं मानवशास्त्रं च इति नामभिः अपि प्रसिद्धा। प्रसन्नता मानवस्य जन्मसिद्धः अधिकारः अस्ति, यस्मिन मानवस्य सर्वहितं समाहितं भवति, एषः एव जीवनस्य मूलमन्त्रः अपि अस्ति। अस्य समर्थनं अस्माकं विद्वद्भिः अपि कृतम्।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्॥[1]

अस्य उक्त्या सिद्धं भवति यत् भारतीयसंस्कृतेः प्रथमं उद्देश्यं सर्वेषां हितार्थं अस्ति। धर्मशास्त्रेषु अपि अस्माकं जीवनस्य उद्देश्यं पूर्णं कर्तुं सद्मार्गस्य अनुकरणं अत्यधिकं बलं दत्तम् अस्ति। तस्य कारणं यत् व्यक्तिः यदा सद्मार्गेण नीत्या शासनव्यवस्थायाः अनुरूपं कार्यं करिष्यति तदा सः न नीतिमार्गतः भ्रंश्येत न च पापकर्मणि लिप्तः भविष्यति। अस्माकं स्मृतिषु पापकर्मणः उपरान्त प्राप्तव्यः दण्डः च प्रायश्चित्तं च विस्तरेण वर्णितं अस्ति, येन वयं अस्माकं अधिकारान् तेषां च हननानन्तरं दण्डं च भलीकृत्य ज्ञातुं शक्नुमः। समाजस्य परिवर्तनशीलगुणस्य कारणेन अद्यत्वे पूर्वकालेभ्यः अनेकेषु क्षेत्रेषु परिवर्तनानि अभवन्। अद्यतनी न्यायव्यवस्था पूर्णतया परिवर्तिता जाता अस्ति। पूर्वकालस्य दण्डः न्यायव्यवस्था च दोषिनं सुधारयितुं तस्य च हितार्थं दत्ता जाता, राजा सम्पूर्णायाः प्रजायाः न्यायं दातुं अधिकारी आसीत्। किन्तु अद्य काले पापकर्मभिः आच्छादितं जातम्। अनेन काले धर्मसूत्राणि स्मृतयः च यथायोग्यं प्रासङ्गिकतया स्वीकर्तव्यानि। पूर्वकालस्य दण्डव्यवस्था प्रायश्चित्तं च अद्यतनीदण्डव्यवस्थायाः मध्ये समयस्य व्यापकता, अपराधस्य अधिकता, अत्यधिकं अपराधिकप्रवृत्तीनां बहुलता, सामाजिकनैतिकमूल्येषु च परिवर्तनं कारणं भवति। एतयोः व्यवस्थयोः मध्ये दोषिनं सज्जनं कर्तुं, तस्य च प्रायश्चित्तं स्वदोषस्य परिहारं च मुख्यं उद्देश्यं अस्ति येन पापकर्मणि नश्यन्ति। अतः अस्य विषये प्रासङ्गिकतायाः विचारं कुर्वन्तु धर्मशास्त्रेषु प्रतिपादितं प्रायश्चित्तविमर्शस्य सूक्ष्मविवेचनं अति आवश्यकम्। एतेन वयं आगामिकाले दोषरहितं समाजं निर्मातुं प्रयासं कर्तुं शक्नुमः। अस्माकं धर्मशास्त्रेषु अपि अयं उल्लेखः अस्ति यः मनुष्यः पापकर्मणि, हत्यायां, चौर्ये, षड्यन्त्रे इत्यादिषु दोषेषु सलिप्तः भवति तस्य प्रथमतः एकः अवसरः दातव्यः यः येन सः स्वदोषं परिष्कृत्य प्रायश्चित्तं कृत्वा सत्पथे अग्रसरः भवेत्।

[1] ऋग्वेद-5/82/5

याज्ञवल्क्यस्मृतौ दण्डविधानं प्रायश्चित्तं च अत्यन्तसूक्ष्मरूपेण वर्णितं अस्ति। अतः अस्माभिः सर्वैः एतस्य अध्ययनं कर्तव्यमेव।

**कूटशब्दः** - धर्मशास्त्रम्, भारतीयसंस्कृतिः, प्रायश्चित्तम्, न्यायव्यवस्था, नैतिकमूल्याः।

**प्रस्तावना-** मनुष्यस्य हृदये द्वे प्रवृत्तेः विद्यमाने स्तः - दैवी प्रवृत्तिः, आसुरी प्रवृत्तिः। दैवी प्रवृत्तेः सुप्तावस्थायां आसुरी प्रवृत्तिः प्रबलता यायाति। यस्मात् कारणात् मनुष्यः चोरी, हत्या, पापकर्म, परस्त्रीगमन इत्यादिषु पापकर्मेषु सलिप्तः भवति, तेन तस्य भाग्यम् अधः पतति। एतादृशं न भवेत् तथा च मानवः आपसी द्वेषभावना न धारयेत् इति उपायः अस्माकं धर्मशास्त्रग्रन्थेषु वर्णितः अस्ति। धर्मशास्त्रग्रन्थेषु यथा मनुस्मृतिः याज्ञवल्क्यस्मृतिः च मानवजीवनं नियन्त्रयितुं तथा नियमितुं विधि-निषेधयोः विस्तृतं विवेचनं कृतम् अस्ति। संस्कृतसाहित्ये अष्टादश स्मृतिग्रन्थानां (धर्मशास्त्रग्रन्थानाम्) उल्लेखः प्राप्तः अस्ति, परन्तु मनुस्मृतिः याज्ञवल्क्यस्मृतिः च एव अद्यत्वे उपलब्धे स्तः। धर्मशास्त्ररूपेण मनुस्मृतिः एव सर्वश्रेष्ठा मन्यता अस्ति –

धर्मशास्त्रं तु वै स्मृतिः।[2]

प्रायश्चित्तशब्दः अति प्राचीनः अस्ति, यस्य प्रयोगः प्राचीनकालात् एव प्रचलितः अस्ति, यथा श्रोतसूत्रेषु, वेदेषु, उपनिषत्सु, धर्मशास्त्रेषु च अस्य प्रमाणं दृष्टुं शक्यते, यः अस्य तथ्यस्य पुष्टिं करोति।

एष वै प्रजापतिः सर्वं करोति योऽश्वमेधेन यजते

सर्व एव भवति सर्वस्य वा एष प्रायश्चित्तिः सर्वस्य भेषजम् इति।[3]

मनुस्मृतिः सर्वश्रेष्ठः धर्मशास्त्रग्रन्थः अस्ति। कदाचित् मनुष्यः कस्यचित् प्रतिकूलपरिस्थितौ पतित्वा पापकर्मणि प्रवृत्तः भवति, दुर्भाग्यवशात् सः तथाविधं संलिप्तं भवति यथा सः अपराधी भवति। कालान्तरे तस्मिन् अपराधबोधः जागरूकः भवति, सः पश्चात्तापाग्नौ दह्यमानः भवति। एतेषु सर्वेषु अवस्थासु धर्मशास्त्रकारैः गम्भीरं मनोवैज्ञानिकं चिन्तनं कृत्वा दोषिनः मनुष्यस्य सुधाराय तं पापविमुखं कर्तुं किञ्चित् विस्तृतं नियमदिशानिर्देशनं कृतम्, यस्य शुद्धिपरिमार्जनं वा प्रायश्चित्तं इति संज्ञा प्राप्ता अस्ति। शुद्धिकरणपरिमार्जनप्रक्रियायाः माध्यमेन पापिनं वा अपराधिनं मनुष्यं शुद्धीकृत्य समाजे सम्मिलितं करोति। मनुस्मृतौ शुद्धिप्रक्रियायाः, प्रेतशुद्धेः, द्रव्यशुद्धेः च विस्तृतं वर्णनं कृतम् अस्ति -

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च।

चतुर्णामपि वर्णानां यथावदनुपूर्वशः॥[4]

[2] मनुस्मृतिः 2/10

[3] तैत्तिरीयसंहिता 5/3/12

[4] मनुस्मृतिः 5/57

E-ISSN: 3048-6041 | Volume- 1, Issue- 9 | September 2024

शबरस्वामिनः मतानुसारं प्रायश्चित्तं द्विविधं भवति -

1. यज्ञाद्यानुष्ठानकार्यस्य अनुष्ठानकाले अकारणं कस्यचित् विघ्नस्य उत्पत्तिः भवति।

2. अकारणं निषिद्धाचरणं अपि पापदोषस्य कारणं भवति, यस्य निवारणार्थं वयं प्रायश्चित्तं कर्तुं प्रवृत्ताः भवामः। अस्य तात्पर्यं यत् यदा यज्ञाद्यानुष्ठानकार्ये दोषः, विघ्नः वा कश्चन विधानः जायते तदा वैदिकानुष्ठानस्य माध्यमेन यजमानः वा यज्ञकर्ता प्रायश्चित्तं कृत्वा स्वदोषं विघ्नं च निवारयति।

वैदिककाले पापकर्मदोषाः, हिंसा, परस्त्रीगमनादयः अनेके अपराधाः दृष्टाः आसन्। तस्मात् दलितवर्गः स्वं दोषिनं मन्यते स्म। निम्नवर्गस्य दमनं अत्यन्तसरलतया सम्भवमासीत्, यतः तेषां रक्षणाय उच्चवर्गीयजनाः उपस्थिताः न आसन्। परन्तु अद्यतने काले तासां परिस्थितयः परिवर्तिताः भवन्ति। अद्य निम्नवर्गः न दबः, न कुचलः, न असहायः अपितु स्वाधिकाराय सजगः अस्ति।

अतः वयं प्रायश्चित्तशब्दस्य प्रयोगं भलीकृत्य ज्ञातुं शक्नुमः। अस्य उपयोगः वेदेषु, अथर्ववेदे, पारस्करगृह्यसूत्रे, तथा शतपथब्राह्मणे अपि दृष्टः अस्ति। वैदिकसाहित्ये प्रायश्चित्तस्य निमित्तं "प्रायश्चित्ति", "प्रायश्चित्तं च" इति पदद्वयं प्रयुक्तम्, यस्य मुख्यं उद्देश्यं पापानां निवारणं अस्ति। महान् विद्वद्भिः अपि प्रायश्चित्तशब्दस्य प्रयोगं स्वव्याख्यानेषु कृतः। सर्वेषां विवरणं असम्भवम्, परन्तु प्रमुखैः उदाहरणैः प्रायश्चित्तस्य ज्ञानं दातुं प्रयत्नः कृतः अस्ति। गौतमधर्मसूत्रे अपि प्रायश्चित्तस्य विषये उल्लेखः कृतः अस्ति- यत् चित्तेन तपःकृतेन वा पूर्णं भवेत् तत् प्रायश्चित्तं इति –

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।

तपेनिश्चयसंयोगात् प्रायश्चित्तमिति स्मृतम्॥[5]

एवमेव अनन्तानां विद्वतां स्वमतानुसारं तर्कपूर्णमाध्यमेन प्रायश्चित्तस्य अवधारणाः प्रस्तुताः सन्ति। सर्वासाम् अवधारणानामवलोकनं कृत्वा, प्रायश्चित्तशब्दं परिभाषितुं मम शोधपत्रे त्रिविधपापानां विवरणं प्रस्तुतं करोमि, यत्र प्रायश्चित्तविमर्शः मया विचारणीयः अस्ति।

१. **मद्यपानम्**
२. **स्तेयम् (चौर्यं)**
३. **ब्रह्महत्या**

**१. मद्यपानम्** - मद्यपानं अपि पापस्य श्रेण्यां अन्तर्गतं गण्यते। यतः मद्यपानानन्तरं मनुष्यः स्वं विवेकं ह्रसयति, यत्कारणात् तेन कृतानि कर्माणि अपि तस्मै यथार्थानि न ज्ञायन्ते। अस्माकं धर्मशास्त्रग्रन्थेषु मद्यपानं महापातकस्य अन्तर्गतं गृहीतमस्ति। ऋग्वेदे प्रथमं मद्यपानस्य उल्लेखः प्राप्यते, तत्र सुराशब्दस्य प्रयोगः कृतः

[5] गौतमधर्म सूत्र 11/16

अस्ति यः द्यूतक्रीडायाम् अपि प्रयोगः क्रियते। न केवलं तत्, मद्यपानं महापातकमिति उच्यते, यस्य पापस्थिति दर्शिता अस्ति -

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरन्धिम्।

कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥[6]

न केवलं वेदेषु अपितु ब्राह्मणग्रन्थेषु अपि मद्यपानं महापातकस्य संज्ञया अभिहितम् अस्ति।

प्रायश्चित्तम् - अस्माकं पूर्वजाः, विद्वानः च मन्यन्ते यत् यदा मनुष्यः किञ्चित् पापकर्म हिंसकं कार्यं वा करोति तदा तस्य दण्डः तेन मनुष्ययोनौ एव भोगितव्यः भवति। परन्तु धर्मशास्त्रेषु उक्तं यत् यदि मनुष्यः एकवारं अपि मद्यपानं यथा महापातकं करोति तर्हि तस्य पापमुक्तिः मृत्योः अनन्तरं एव लभ्यते, अथवा न च लभ्यते। अस्माकं स्मृतिग्रन्थेषु अपि मद्यपानस्य अन्यानि च पापानि विवरणरूपेण दृष्टानि भवन्ति। याज्ञवल्क्यस्मृतौ निर्दिष्टं यत् यदि मनुष्यः मद्यपानसमये अन्यं पेयपदार्थं यथा घृतं, क्षीरं, गोमूत्रं वा सेवते तर्हि सः तदा मरणासन्नः भवति, यतः तस्य शुद्धेः मार्गः सुलभः भवति इति विवरणं लभ्यते। बौधायनसूत्रकारेण अपि अस्मिन विषये स्वमतं प्रस्तुतं कृतम् अस्ति - मद्यपानं कृत्वा पापी व्यक्ति कृच्छ्रनामकव्रतस्य अनुष्ठानं त्रिमासपर्यन्तं निरन्तरं कर्तुं आवश्यकम् अस्ति, ततः अनन्तरं सः शुद्धः भविष्यति।

**२. स्तेयम् (चौर्यं)** - स्तेयम् इति तस्य वस्त्रस्य वा अन्यस्य वस्तुविशेषस्य अनधिकृतं ग्रहणं, या वस्तु अस्माकं नास्ति, अन्यस्य सहमतिविरुद्धं च चुपचापमपहरणं कृतं यत्कर्म पापरूपेण गण्यते। कस्यापि वस्तुविशेषस्य स्वामिनः अर्थात् अधिकारीस्य अनुमति-विरुद्धं तस्य वस्तु ग्रहणं निन्दनीयम् अस्ति। यथा- फलं चोरयितुम्, उद्याने पुष्पाणि चोरयितुम्, वृक्षेभ्यः दारूनि चोरयितुम् इत्यादि। एते सर्वे चोरीनाम्नि अन्तर्गताः भवन्ति। प्राचीनभारतीयवाङ्मये पापकर्ता च पापकर्मणि प्रेरकः च समानरूपेण पापस्य भागीदारः भवति।

ऋग्वेदस्य प्राचीनतमेषु पातकसम्बन्धिनी या धारणा अस्ति सा ऋतस्य धारणा या संलग्ना अस्ति। हिन्दूधर्मशास्त्रेषु पापस्य पातकस्य च विविधा विवेचना प्राप्यते। आपस्तम्बधर्मसूत्रे पातकानां वर्गीकरणं निम्नप्रकारेण प्रदत्तं वर्तते- भ्रूणहत्या, सुरापानं, सुवर्णचौर्यं, गुरोर्व्यभिचारः, परस्त्रीगमनं, ब्रह्महत्या, स्त्रीहत्या इत्यादयः। न केवल एतावदेव विष्णुधर्मसूत्रे पापानां नवविधाः भेदाः वर्णिताः सन्ति- अतिपातकं, महापातकं, अनुपपातकं, उपपातकं, जातिभ्रंशकरं, संकराकरणं, अपात्रीकरणं, मलावहं, प्रकीर्णकं च।

**प्रायश्चित्तम् -** आचार्यगौतमस्य आपस्तम्बस्य च मतानुसारं चोरः स्वयं केशान् विकीर्णयित्वा सकन्धे मुषलं स्थापयित्वा राज्ञः पुरतः सन्निधाय स्वमपराधं स्वीकुर्वन् तिष्ठति चेत् राजा तेनैव मुषलेन तं चोरं प्राणघातप्रहरेण हन्ति। ततः प्राणवियोगेन स चोरः पापात् विमुच्यते। मनुस्मृतौ चौर्यस्य प्रायश्चित्तं कृच्छ्रव्रतं एकवर्षपर्यन्तं कृत्वा सम्प्राप्तं भवति, ततोऽसौ पापात् निवृत्तः शुद्धो भवति।

[6] ऋग्वेदसंहिता 1/116/7

चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम्।

शारीरं धनसंयुक्तं दण्डं धर्मं प्रकल्पयेत्॥[7]

**३. ब्रह्महत्या -** अस्माकं ग्रन्थेषु चतुर्णां वर्णानां उल्लेखः कृतः अस्ति। सम्भवतः सर्वे वर्णाः स्वयमेव श्रेष्ठाश्च उच्चाश्च सन्ति, किन्तु ब्राह्मणः सर्वेषां वर्णानां मध्ये श्रेष्ठः पूजनीयश्च अस्ति। तस्य तुल्यं किमपि नास्ति। तस्य हत्या यथा महापातकं, कल्पनायामपि हृदयस्पन्दनं करोति। सर्वेऽधिकाराः धर्मशास्त्रकाराणां ब्रह्महत्यां महापातकत्वेन स्वीकृतवन्तः। हरिदत्तस्य महोदयस्य, मनुस्मृतिकारस्य, आपस्तम्बसूत्रकारस्य च तदनुमोदनं कृतं वर्तते। तैत्तिरीयसंहितायां अपि ब्रह्महत्यां महापापं इति स्वीकृतम् - "ब्रह्महत्यामुपागृह्यत्" इति।

यदि कश्चित् पुरुषः केनापि कारणेन ब्रह्महत्या यथा महापातकं करोति तर्हि तं वनं गत्वा कुटिं निर्माय एकान्ते वासं कर्तव्यम्। स वाणीं संयम्य शीर्षे कुण्डं धारयित्वा, हस्ते धातुपात्रं गृहीत्वा, ईश्वरस्य नामोच्चारणं कुर्वन् द्वादशवर्षपर्यन्तं प्रायश्चित्तं कर्तुमर्हति। ततः पश्चात् स शुद्धो भविष्यति। मनुस्मृतिकारः अपि एतत् प्रायश्चित्तं स्वीकृतवान् -

ब्रह्महा द्वादश समाः कुटिं कृत्वा वने वसेत्।

भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्॥[8]

निष्कर्षतः वयं वक्तुं शक्नुमः यत् धर्मशास्त्रं केवलं इहलोकस्य समृद्धिं सुखमयं च न करोति, अपितु मानवं पापकर्मणः निवृत्तिं प्रदाय अहिंसामार्गे प्रेरयति। प्राचीनकालादारभ्य दण्डव्यवस्था प्रायश्चित्तं च उभे परम्परे सुचारुरूपेण प्रचलिते स्तः। किन्तु प्राचीनकाले दण्डदानस्य अधिकारः केवलं राज्ञः आसीत्, किन्तु अद्यतनसमाजे तथा सामाजिके दायित्वे निर्वहणाय दोषिणः दण्डदानस्य नियमः आवश्यकः अभवत्। अत एव पापात् निवृत्त्यर्थं प्रायश्चित्तस्य विधानं कृतं यतः सम्पूर्णमानवजातिः पापमुक्ता भवेत् तथा तस्य संवर्धनं सम्पूर्णरूपेण सिध्येत्। मनुस्मृतौ अपि पापात् मुक्त्यर्थं उचितप्रायश्चित्तस्य वर्णनं कृतं अस्ति, यतः यदा मनुष्यः सम्यग्मार्गं न प्राप्नोति तदा सः निन्दितमार्गस्य अनुशीलनं करोति। अतः अद्यतनकाले अपि प्रायश्चित्तस्य अत्यन्तं आवश्यकता वर्तते। तस्य सर्वाधिकं महत्त्वं यत् मनुष्यः अनजानेऽपि पापं कृत्वा स्वं दोषिणं मन्यते तर्हि सः किञ्चित् अनुचितं पथि न गच्छेत्, किन्तु स्वपापस्य प्रायश्चित्तं कृत्वा स्वस्य मूल्यवन्तं जीवनं रक्षितुमर्हति। प्रायश्चित्तं कृत्वा मनुष्यस्य हृदयं शुद्धं भवति, तस्य मस्तिष्के पापकर्मणः आत्मग्लानिः पूर्णरूपेण निवर्तते, तस्य आत्मशुद्धिः जायते। पापकर्मणः अनन्तरं तस्य मनः अशान्तं भवति, घृणया परिपूर्णं च। किन्तु प्रायश्चित्तस्य अनन्तरं सः आत्मसन्तोषं प्राप्नोति। अतः एतेषु सर्वेषु बिन्दुषु गहनतया विचार्य वयं निश्चितं कुर्मः यत् प्रायश्चित्तस्य मानवजीवने अत्यधिकं महत्त्वं वर्तते।

---

[7] मनुस्मृति- 9/236

[8] मनुस्मृति- 11/72

E-ISSN: 3048-6041 | Volume- 1, Issue- 9 | September 2024

## ग्रन्थसूची


1. ऋग्वेद संहिता, श्रीराम शर्मा आचार्य
2. मनुस्मृति, गंगानाथ झा
3. गौतम धर्मसूत्रम्, प्रमोदवर्धनः कौण्डिन्यायनः
4. याज्ञवल्क्यस्मृतिः, डॉ० उमेश चन्द्र पाण्डेय
5. मनुस्मृति, डॉ० राकेश शास्त्री
6. मनुस्मृति, केशव किशोर कश्यप, चौखम्भा कृष्णदास अकादमी, वाराणसी
7. ऋग्वेद, डॉ० गंगा सहाय शर्मा, संस्कृत साहित्य प्रकाशन
8. आपस्तम्ब-धर्मसूत्रम्, डॉ राकेश शास्त्री, चोखम्भा ओरियन्टालिया